योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०९३

त्रिनवतितमः सर्गः ९३

श्रीवसिष्ठ उवाच ।

इति मे भगवता पूर्वमुक्तं तदेतदद्य तुभ्यं कथितम्।। १

तस्मादनाख्यानाद्ब्रह्मणः सर्वतः सर्वमनाख्यान-

मुत्पद्यते स्वयमेव तद्घनतां प्राप्य मनः संपद्यते ।। २

तन्मनस्तन्मात्रकल्पनपूर्वकसन्निवेशं भवति तत-

स्तैजसः पुरुषः संपद्यते सोऽयं ब्रह्मेत्यात्मनि नाम

कृतवान् ।। ३

तेन राम योऽयं परमेष्ठी तन्मनस्तत्त्वं विद्धि ।। ४

समनस्तत्त्वाकारो भगवानब्रह्मा संकल्पमयत्वाद्य-

देव संकल्पयति तदेव पश्यति ।। ५

ततस्तेनेयमविद्या परिकल्पिता अनात्मन्यात्मा-

भिमानमयीति तेन ब्रह्मणा गिरितृणजलधिमयमिदं

क्रमेण जगत्परिकल्पितम् ।। ६

इत्थं क्रमेण ब्रह्मतत्त्वादियमागता सृष्टिरन्यत

एवागतेयमिति लक्ष्यते ।। ७

तस्मात्सर्वपदार्थानां त्रैलोक्योदरवर्तिनाम् ।

उत्पत्तिर्ब्रह्मणो राम तरङ्गाणामिवार्णवात् ।। ८

य एवमनुत्पन्ने जगति या ब्रह्मणश्चिन्मनोरूपिणी

साहंकारे परिकल्प्य ब्रह्म ब्रह्मतामेति ।। ९

यास्त्वन्याश्चिच्छक्तयः सर्वशक्तेरभिन्ना एव

कल्प्यन्ते ।। १०

जगति स्फारतां नीते पितामहरूपेण मनसा समुल्लसन्ति ।। ११

एते सहस्रशोऽपि परिवर्तमानजीवा उच्यन्ते १२

तेऽभ्युत्थिता एव चिन्नभसो नभसि तन्मात्रैरावलिता गगनपवनान्तर्वर्तिनश्चतुर्दशविधा ये भूतजातमध्यतयाभ्यासे तिष्ठन्ति तस्या एव प्राणशक्तिद्वारेण प्रविश्य शरीरं स्थावरं जंगमं वापि बीजतां गच्छन्ति ।। १३

तदनु योनितो जगति जायन्ते तदनु काकतालीययोगेनोत्पन्नवासनाप्रवाहानुरूपकर्मफलभागिनो भवन्ति ।। १४

ततः कर्मरज्जुभिर्वासनावलिताभिर्बद्धशरीरा भ्रमन्तः प्रोत्पतन्ति च ।। १५

इच्छैवैता भूतजातयः ।। १६

काश्चिज्जनसहस्रान्ताः पतन्ति वनपर्णवत् ।
कर्मवात्या परिभ्रान्ता लुठन्ति गिरिकुक्षिषु ।। १७

अप्रमेयभवाः काश्चिच्चित्सत्ताज्ञानमोहिताः ।
चिरजाता भवन्तीह बहुकल्पशतान्यपि ।। १८

काश्चित्कतिपयातीता मनोरमभवान्तराः ।
विहरन्ति जगत्यस्मिन्शुभकर्मपरायणाः ।। १९

काश्चिद्विज्ञातविज्ञानाः परमेव पदं गताः ।
वातोद्धूताः पयोमध्यं सामुद्रा इव बिन्दवः ।। २०

उत्पत्तिः सर्वजीवानामितीह ब्रह्मणः पदात् ।
आविर्भावतिरोभावभङ्गुरा भवभाविनी ।। २१

वासनाविषवैषम्यवैधुर्यज्वरधारिणी ।

अनन्तसंकटानर्थकार्यसत्कारकारिणी ।। २२

नानादिग्देशकालान्तशैलकन्दरचारिणी ।

रचितोत्तमवैचित्र्यविहिताऽऽसंभ्रमाऽसती ।। २३

एषा जगज्जाङ्गलजीर्णवल्ली

सम्यक्समालोककुठारकृत्ता ।

वल्लीव विक्षुब्धमनःशरीरा

भूयो न संरोहति रामभद्र ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे उत्पत्तिदर्शनं नाम त्रिनवतितमः सर्गः ।। ९३ ।।